वर्षम्-०४ अङ्कः-०४ शोधज्योतिः
जनवरी-दिसम्बर, २०२२ ISSN-2350-0700

पञ्चाङ्गस्य सैद्धान्तिकस्वरूपम्

डॉ. नित्यानन्द ओझा[१]

अस्माभिरवगम्यते यत् आकाशस्थानां नक्षत्रग्रहपिण्डानां प्रभावं मानवजीवनोपरि प्रत्यक्षाप्रत्यक्षरूपेण भवत्येव। एतस्य प्रभावस्य निरूपणं यस्मिन् शास्त्रेऽस्ति तज्ज्योतिषशास्त्रमिति उच्यते। अस्य शास्त्रस्य प्रणयनं ब्रह्मणा वेदविहित-कार्याणां सम्पादनार्थं कृतमिति। वेदे तु जगतः सर्वेऽपि विषयाः सन्निविष्टाः। नात्र कश्चिदपि विषयोऽनुपलभ्यो यथातथ्येनान्वेषयतां विदुषाम्, परन्तु सामान्यतया वेदस्य मुख्यप्रयोजनं यज्ञसम्पादनं, यागाश्च वेदवाक्यांशैरेव कालाधीनाः सिद्ध्यन्ति अर्थात् कालविशेष एवायोजिता यागाः साफल्यमाप्नुवन्ति। अत एव परम्परायामस्य वेदाङ्गत्वेन वर्णनमुपलभ्यते। यथाह भास्करः -

वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।
शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्॥[२]

सकलेऽस्मिन् ब्रह्माण्डगोले सृष्टेर्मूलमन्त्रस्य भगवतो वेदस्य व्याकरणादीनि वैधकर्मणि विधीयमानसहायकानि षडङ्गानि सन्ति। तेषु षट्ष्वङ्गेष्वपि प्रधानभूतं नेत्रस्वरूपं ज्योतिषं मूर्ध्नि संस्थितम्-

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम्॥[३]

न केवलं वेदविहिता यज्ञादयः अपितु वेदातिरिक्ताः अन्ये व्यवहारिकपक्षा अपि कालाधीनाः भवन्ति। यथा आजन्ममृत्युपर्यन्तसंस्काराणां, लौकिकव्यवहारे धर्मकृत्य-पर्व-स्नान-दान-व्रतादि-सहितानां सर्वेषां संस्काराणां निर्धारणं नियतेनैव कालेन अयन-मास-पक्ष-तिथि-वार-नक्षत्र-करण-योग-राशि-लग्नादिवशाद् भवति अर्थात् एतानि व्यवहारिककार्याणि पञ्चाङ्गशुद्धिकालद्वारा एव अनुष्ठीयन्ते। एतेषु विशेषकार्यसम्पादनार्थं कालनिर्धारणभूतावयवेषु मुख्यानि तिथि-वार-नक्षत्र-योग-करणानीति यत्र शाकल्येन प्रतिपादितानि भवन्ति तदेव पञ्चाङ्गम्। अर्थात् एतस्मिन् वेदस्य चक्षूरूपात्मके कालविधायक-ज्योतिषशास्त्रे तिथि-वार-नक्षत्र-योग-करणानां समाहारः पञ्चाङ्गसँज्ञया व्यवह्रियते

---

[१] सहायकाचार्यः, ज्योतिष विभागः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

[२] सिद्धान्तशिरोमणिः अ.१ श्लोकसं.९ व्याख्याकार- पं गिरिजा प्रसाद द्विवेदी, प्रकाशक- चौखम्भा विद्याभवन, संस्करण-२००७

[३] वेदाङ्गज्योतिषम् श्लो.सं. ४ व्याख्याकारः- शिवराज आचार्यः कौण्डिन्न्यायनः प्रकाशक- चौखम्भा विद्याभवन वाराणसी संस्करण-२००५

एतस्य महत्त्वमस्माभिः प्रायशः सर्वत्र दरीदृश्यते तद्यथा-

तिथिर्वारनक्षत्रे योगः करणमेव च।
पञ्चाङ्गस्य फलं श्रुत्वा गंगास्नानफलं लभेत्॥
जानाति काले पञ्चाङ्गं तस्य पापं न विद्यते।
तिथेस्तु श्रियमाप्नोति वारादायुष्यवर्द्धनम्॥
नक्षत्राद्धरते पापं योगाद्रोगनिवारणम्।
करणात्कार्यसिद्धिः स्यात् पञ्चाङ्गफलमुच्यते॥

अतो पञ्चाङ्गसाधनोपयोगत्वात् तदानयनस्य ज्योतिषसिद्धान्तपक्षः समीक्ष्यते। प्रायः सर्वेषु पञ्चाङ्गेषु तिथिनक्षत्रयोगानां साधनं करणपक्षीयगणेशदैवज्ञकृतग्रहलाघवेन कृतो दरीदृश्यते, प्रस्तूयते रविचन्द्रस्पष्टाधिकारोक्तं पञ्चाङ्गसाधनम्, यथा-

''भक्ता व्यर्कविधोर्लवा यमकुभिर्याता तिथिः स्यात् फलं
शेषं यातमिदं हरात् प्रपतितं भोग्यं विलिप्तास्तयोः।
भुक्त्योरन्तरभाजिताश्च घटिका यातैष्यकाः स्युः क्रमात्
पूर्वार्द्धे करणं बवाद्गततिथिर्द्विघ्यद्रितष्टा भवेत्॥
तत्सैकं त्वपरे दलेऽथ शकुनेः स्युः कृष्णभूतोत्तरा-
दर्धाच्चाऽथ विधोश्च सार्कसितगोर्लिप्ताः खखाष्टोद्धृताः।
याते स्तो भयुती क्रमाद्गगनषण्णिघ्ने गतैष्यै तयो-
रिन्दोर्भुक्तिहृते जवैक्यविहृते यातैष्यनाड्यः क्रमात्॥''[४]

जगतप्रसिद्धमिदं पञ्चाङ्गसाधनार्थसूत्रम्, प्रसङ्गात् सूर्यसिद्धान्तस्य प्रस्तूयतेऽत्र मूलपाठः-

''भभोगोऽष्टशतीलिप्ताः खाश्विशैलास्तथा तिथेः।
ग्रहलिप्ता भभोगाप्ता भानि भुक्त्या दिनादिकम्॥
रवीन्दुयोगलिप्ताश्च योगा भभोगभाजिताः।
गतगम्याश्च षष्टिघ्नो भुक्तियोगाप्तनाडिकाः॥
अर्कोनचन्द्रलिप्तास्तु तिथयो भोगभाजिताः।
गता गम्याश्च षष्टिघ्नो नाड्यो भुक्त्यन्तरोद्धृताः॥''[५]

---

[४] *ग्रहलाघवम् करणम्, रविचन्द्रस्पष्टाधिकारः श्लो.स.८-९ व्याख्याकार- प्रो. रामचन्द्र पाण्डेय, प्रकाशक- चौखम्भा संस्कृत सीरीज आफिस वाराणसी, संस्करण-१९९४*

[५] *सूर्यसिद्धान्तः स्पष्टाधिकारः श्लो. सं.६४-६६ व्याख्याकार- डॉ.सत्येन्द्र मिश्र प्रकाशक- चौखम्भा संस्कृत भवन वाराणसी संस्करण-२००८*

इदानीं अनेन सिद्धान्तेन क्रमेण पञ्चाङ्गस्य अङ्गानां परिचयपुरस्सरं सैद्धान्तिकस्वरूपमुपस्थाप्यते-

तिथिसाधनम्-

तनोतीति तिथिः अर्थात् विस्तारयति चद्रकलामिति तिथिः,तन्यते चन्द्रकलयेति वा।

३६० अंशात्मिकायां ग्रहकक्षायां भ्रमणवशाद्यदि सूर्यचन्द्रमसोर्गत्यन्तरं द्वादशांशतुल्यं भवति तर्हि एका तिथिरुत्पद्यते। अनेन ३६०°÷१२°= ३० तिथयः एकस्मिन् मासे भवन्ति। एवमेव एकस्मिन् चन्द्रमासे तिथयस्त्रिंशत् शुक्लकृष्णपक्षयोः क्रमेण प्रतिपदातः पूर्णिमान्तममान्तं यावच्च भवति यथा-

प्रतिपच्च द्वितीया च तृतीया तदनन्तरम्।
चतुर्थी पञ्चमी षष्ठी सप्तमी चाष्टमी तथा॥
नवमी दशमी चैवैकादशी द्वादशी ततः।
त्रयोदशी ततो ज्ञेया ततः प्रोक्ता चतुर्दशी।
पौर्णिमा शुक्लपक्षे तु कृष्णपक्षे त्वमा स्मृता॥[६]

वस्तुतस्तु अमावस्यायां तिथौ सूर्यचन्द्रमसोः स्थितिः एकस्मिन्नेव बिन्दौ भवति- "तुल्यराश्यादिभिः स्यातामामावस्यान्तकालिकौ"[७] इति वचनात् अमान्तकालिकौ रविचन्द्रौ राशिचक्रे राश्यादिभिः तुल्यौ स्याताम्। अतो अमावस्यातिथितः चान्द्रमासस्य प्रवृत्तिः भवति। अनेन अमान्तादमान्तं ३० तिथयः ३६० अंशाश्च भवन्ति। अत एव एकस्याः तिथेः अंशात्मकमानं $\frac{३६०}{३०}$ = १२अंशाः। अतोऽत्र-

∵१अंशः =६०कलाः

∴१२अंशाः╳ ६० कलाः = ७२० कलाः = १ तिथिः।

तिथेः साधनक्रमे स्पष्टचन्द्रात् स्पष्टसूर्यं विशोधनात् याः शेषकलाः भवन्ति तासु तिथेः कलात्मकमानैः भागं कार्यं तदा या लब्धिः आगच्छेत् सा गततिथेः संख्या भवेत्। तत्र यत् शेषमानं प्राप्तं तत् वर्तमानतिथेः गतकलानां मानं ज्ञेयम्। अनन्तरं तिथेः कलात्मकमानेन(७२० कलाभिः) वर्तमानतिथेः गतकलात्मकमानं विशोधनेन वर्तमानतिथेः ऐष्यमानं भवेत्। ततः यातैष्यमानयोः योजनेन तिथेः पूर्णमानं भवेदिति। अत्र सूत्रात्मकरूपेण एतस्याः ज्ञानं कर्तुं शक्यते यथा-

तिथिसाधनार्थं सूर्यान्तरितचन्द्रमसः कलाः तिथिभोगः720 कलया भक्ता लब्धिः गततिथिः स्यादिति। यतोहि तिथिनाम चान्द्रदिवसम्। तत्तु रविचन्द्रयोः प्रतिद्वादशांशान्तरेण तुल्यं भवति।

[६] *मुहूर्तगणपतिः तिथिप्रकरणम् श्लो.सं. १-२-१/२ व्याख्याकारः –मुरलीधर चतुर्वेदी प्रकाशन- मोतीलाल वनारसी दास संस्करण वर्षम्- १९८८*

यतश्चन्द्रार्कयोः संगमकालादन्यसंगमकालं यावद्भांशमितास्त्रिंशतिथिभुक्ता भवन्ति, अतो युक्तियुक्तमेवोक्तं भास्करेण-

''रवीन्द्वोर्युते संयुतिर्यावदन्या विधोर्मासः''[८]

अतोऽमान्तादग्रे शीघ्रगत्याचन्द्रचलनात्तयोः 12 भागांतरांशं यावत् शुक्लप्रतिपत्तिथिः, 24 अंशान्तरतुल्ये द्वितीया एवञ्च क्रमेण यदा 180 भागान्तरांशास्तदा पूर्णिमा, 180 तः 192 भागं यावत्प्रतिपत्कृष्णा। अतो स्पष्टमेवास्ति 12 भागाः = 720 कला इति। गततिथिलब्धिः स्यात् यदा यच्छेषं 60 गुणितं रविचन्द्रगत्यन्तरेण भाजिते सति वर्त्तमानतिथेः गतगम्यमानं भवति। अर्थात् चन्द्रार्कयोः राश्यादिमानान्तरितफलं कलादिकं कृत्वा 720 कलाभिर्भक्ता लब्धिगततिथिसंख्या शेषश्च वर्तमानतिथेः गतकला भवति। गतकलाः 720 कलाभिर्विशोधिता शेषम् ऐष्यकला भवति, गतकलाः 60 भिर्गुणिता रविचन्द्रगत्यन्तरकलाभिर्भाजिता गतमानं भवति तथा च ऐष्यकलाः 60 भिर्गुणिता रविचन्द्रगत्यन्तरेण भाजिता ऐष्यमानं भवति। द्रष्टव्यमत्र सूत्ररूपेण-

स्पष्टचन्द्रः - स्पष्टसूर्यः = $\frac{\text{शेषकला}}{720}$ = लब्धिगतिथिः।

शेषं वर्त्तमानतिथिकलाः।

720-शेषकलाः = ऐष्यकलाः।

$\frac{\text{शेषगतकलाः x60}}{\text{चन्द्रगतिः−सूर्यगतिः}}$ = गतघट्यादिमानम्।

$\frac{\text{ऐष्यकलाः x60}}{\text{चन्द्रगतिः−सूर्यगतिः}}$ = ऐष्यघट्यादिमानम्।

एकस्मिन् चान्द्रमासे त्रिंशत्तिथयो भवन्ति। चान्द्रमासं हि अमान्तादमान्तं भवति। अतोऽनुपातः क्रियते-

30 तिथिषु 21600 चक्रकलास्तदा एकस्यां तिथौ कियत्यः? इति।

$\frac{21600 \text{ x } 1}{30}$ = 720 कलाः एकतिथेर्मानं लब्धम्।

भुक्तभोग्यज्ञानार्थमनुपातः - यदि 720 कलाभिरेकातिथिस्तदा सूर्यचन्द्रान्तरकलाभिः किमिति?

$\frac{1\,x\ (\text{स्पष्टचन्द्रकलाः−स्पष्टसूर्यकलाः})}{720}$ = लब्धिः गततिथिः।

शेषं वर्त्तमानतिथेः भुक्तकलाः। 720 - भुक्तकला = भोग्यकलाः।

---

[८] *सिद्धान्तशिरोमणिः अ.१ श्लोकसं.१९ व्याख्याकार- पं गिरिजा प्रसाद द्विवेदी, प्रकाशक- चौखम्भा विद्याभवन, संस्करण-२००७*

पुनरनुपातः - यदि सूर्यचन्द्रगत्यन्तरकलाभिः 60 घटिकास्तदाभुक्त-भोग्यकलाभिः किमिति? तदा-

$$\frac{60\text{x}\text{भुक्तकलाः/भोग्यकलाः}}{\text{स्पष्टचन्द्रगतिः}-\text{स्पष्टसूर्यगतिः}}$$ = भुक्तभोग्यमाने, इतिसिद्धम्।

सूर्यचन्द्रयोरन्तरमानेन तिथीनां ज्ञानं अधोनिर्मितेन चक्रेण सम्यक्तया ज्ञातुं शक्यते-

सूर्यस्य अंशाः	चन्द्रस्य अंशाः	सूर्यचन्द्रयोः अंशान्तरम्	तिथयः
१°	१३°	१२°	प्रतिपदा
२°	२६°	२४°	द्वितीया
३°	३९°	३६°	तृतीया
४°	५२°	४८°	चतुर्थी
५°	६५°	६०°	पञ्चमी
६°	७८°	७२°	षष्ठी
७°	९१°	८४°	सप्तमी
८°	१०४°	९६°	अष्टमी
९°	११७°	१०८°	नवमी
१०°	१३०°	१२०°	दशमी
११°	१४३°	१३२°	एकादशी
१२°	१५६°	१४४°	द्वादशी
१३°	१६९°	१५६°	त्रयोदशी
१४°	१८२°	१६८°	चतुर्दशी
१५°	१९५°	१८०°	पूर्णिमा
३०°	३९०°	३६०°	अमावस्या

नक्षत्रसाधनम्

न क्षरति चलतीति नक्षत्रमिति।अर्थात् यस्य क्षरणं ह्रासं वा न भवति। ज्योतिषशास्त्रे ग्रहनक्षत्ररूपाङ्गयोः गतिद्वयमेव वर्तते- स्थिरत्वं चलत्वञ्च। तत्र ग्रहाः चलत्वेन नक्षत्राणि च स्थिरत्वेन अवगम्यन्ते। अतोऽत्र नक्षत्राणां स्थिरतायाः ह्रासः क्षरणं वा न भवति, न च उत्पद्यते।

वस्तुतस्तु आकाशे वर्तमानानां तारकाणां समूहः नक्षत्रमिति। सूर्यभ्रमणवृत्तस्य (राशि-मण्डलस्य) तुल्याः द्वादशविभागाः क्रियन्ते। ते एव‘ १२ राशयः भवन्ति। अस्य राशि-मण्डलस्य एव तुल्याः सप्तविंशतिः

विभागाः सप्तविंशतिः नक्षत्राणि इति उच्यन्ते। एतेषु सप्तविंशत्यां विभागेषु प्रतिविभागं यावन्तः तारकाः आयान्ति तेषां समूहः एव नक्षत्रम् इति उच्यते। एतेषां तारकाणां रेखाभिः योजनेन या आकृतिः उत्पद्यते तदनुसारेण तस्य नक्षत्रस्य नाम आचार्यैः निर्धारितम्।

किन्तु क्वचित् अष्टाविंशतिसंख्यात्मकानां नक्षत्राणामपि उल्लेखः क्रियते। अत्र ध्यातव्यमस्ति यत् नक्षत्राणि तु सप्तविंशतिः एव भवन्ति किन्तु कुत्रचित् प्रयोजनवशात् यथा अष्टोत्तरीदशादिसाधने अष्टाविंशतिः नक्षत्राणां गणना क्रियते। नक्षत्राणाम् अष्टाविंशतिसंख्याग्रहणे कारणमेतत् वक्तुं शक्यते यत् क्रान्तिवृत्तस्य सप्तविंशतिभागं तथा तस्मिन् भागे स्थितान् तारकान् च अधिकृत्य नक्षत्रमिति नामकरणं महर्षिभिः कृतमिति प्रतीयते। क्रमेऽस्मिन् यदा उत्तराषाढाश्रवणेतिनक्षत्रद्वयम् अवलोक्यते, तत्र उत्तराषाढानक्षत्रस्य भागे द्वौ तारकौ कथितौ, श्रवणस्य च भागे त्रयः तारकाः उल्लिखिताः वर्तन्ते।

अनयोः उत्तराषाढाश्रवणयोः सन्धिस्थलेऽपि अतिरिक्ताः त्रयः तारकाः उल्लिखिताः सन्ति। एतेन अनुमीयते यत् उत्तराषाढाश्रवणनक्षत्रयोः तारकान् अतिरिच्य तयोः सन्धिक्षेत्रे एव नक्षत्रवत् तारकाणां समूहस्य दर्शनात् तत्स्थलमपि नक्षत्ररूपेण ग्रहणीयं किन्तु नक्षत्रस्य कृते क्रान्तिवृत्तीयस्य सप्तविंशतिभागस्य प्राधान्यात् तत्र तावन्मितभागस्य अभावात् तत्सन्धिस्थलं नक्षत्रसंज्ञया न व्यहृतम्। किन्तु योगतारकाणां संख्या नक्षत्रसमानत्वात् नक्षत्रवच्च तस्य निश्चयेन प्रभावोत्पादकं मत्वा विबुधैः कुत्रचित् तदपि अष्टाविंशतितमं नक्षत्ररूपेण स्वीकृतमिति। एवं प्रकारेण क्रान्तिवृत्तस्य सप्तविंशतितमस्य भागस्य नक्षत्रसंज्ञा सर्वत्र प्रमाणिकरूपेण स्वीक्रियते, अतः नक्षत्राणां संख्या सप्तविंशतिः एव अस्ति।

नक्षत्राणां नामानि इत्थं सन्ति –

१. अश्विनी	८. पुष्यम्	१५. स्वाती	२२. श्रवणः
२. भरणी	९. आश्लेषा	१६. विशाखा	२३. धनिष्ठा
३. कृत्तिका	१०. मघा	१७. अनुराधा	२४. शतभिषक्
४. रोहिणी	११. पूर्वा-फाल्गुनी	१८. ज्येष्ठा	२५. पूर्वा-भाद्रपद्
५. मृगशिरा	१२. उत्तरा- फाल्गुनी	१९. मूलम्	२६. उत्तरा- भाद्रपद्
६. आर्द्रा	१३. हस्तः	२०. पूर्वा-षाढा	२७. रेवती
७. पुनर्वसु	१४. चित्रा	२१. उत्तरा-षाढा	

नक्षत्रसाधनक्रमे नक्षत्रस्य सकला भोगकलाः 800 कलाः भवति; यतो हि सप्तविंशतिविभागात्मकस्य क्रान्तिवृत्तस्य 21600 कलाः भवन्ति अत एव 21600÷27=800 तथा च तिथिरेका भोगकलाः 720 कलाः भवति। स्फुटग्रहस्य राश्यादिमानकलाः नक्षत्र-भोग 800कलाभिः भाजिता लब्धिः गतनक्षत्रं भवति। अत्र शेषो यल्लब्धं तद्वर्त्तमाननक्षत्रभुक्तकलया ग्रहगत्या वा

गतगम्यदिनादिसाध्यम् अर्थाच्छेषं ग्रहगत्याभाजितं साम्प्रतिकनक्षत्रस्य भुक्तदिनादिमानं भवति शेषकला 800 भिर्विशोधिता शेषे ग्रहगतिभक्ता भोग्यदिनादिमानं भवति।

नक्षत्रसाधनम्-

$\frac{\text{स्फुटग्रहकलाः}}{800}$ = लब्धिः = गतनक्षत्रसंख्या।

शेषं वर्त्तमाननक्षत्रस्य गतमानम्।

800 - शेषं = ऐष्यमानम्।

$\frac{\text{गतमानम्}}{\text{ग्रहगतिकलाः}}$ = वर्त्तमाननक्षत्रस्य गतघट्यादिमानम्।

$\frac{\text{ऐष्यकलाः}}{\text{ग्रहगतिकलाः}}$ = वर्त्तमाननक्षत्रस्य ऐष्यघट्यादिमानम्। इति।

नक्षत्रसाधनोपपत्तिः- एकस्मिन् भचक्रे 27 नक्षत्राणि भवन्ति, अतोऽत्रानुपातेनैकनक्षत्रकलामानज्ञानार्थम्-

यदि 27 नक्षत्रेषु 21600 चक्रकलास्तदा एकनक्षत्रे कियत्यः?

= $\frac{21600 \text{ x } 1}{27}$ = 800 = एकनक्षत्रसम्बन्धितकलाः।

एवं प्रकारेण ग्रहाणां गतगम्यादिज्ञानार्थमनुपातः-

यदि 800 भभोगकलाभिरेकं नक्षत्रं तदाऽभीष्टग्रहकलाभिर्कियत्यः?

= $\frac{1\text{x}\text{अभीष्टग्रहकलाः}}{800}$ = गतनक्षत्रसंख्या। शेषं वर्तमाननक्षत्रगतकलाः।

= 800-गतकलाः = भोग्यकलाः।

गतगम्यादिज्ञानार्थमनुपातः- यदि ग्रहगतिकलाभिरेकं दिनं तदा नक्षत्रस्य गतकलाभिः गम्यकलाभिः किमिति?

= $\frac{1\text{x}\text{गतकलाः}/\text{गम्यकलाः}}{\text{ग्रहगतिकलाः}}$ = लब्धिः वर्त्तमाननक्षत्रभुक्तभोग्यमानेइति सिद्धम्।

योगः-

सूर्यचन्द्रयोः गत्योः योगः योग इति उच्यते। अनयोः सूर्यचन्द्रयोः गतियोगेन २७ योगाः उत्पद्यन्ते-

विष्कम्भः प्रीतिरायुष्मान् सौभायं शोभनाभिधः।
अतिगण्डः सुकर्माख्यौ धृतिः शूलाभिधानकः॥
गण्डो वृद्धिर्ध्रुवश्चाथ व्याघातो हर्षणाभिधः।
वज्रं सिद्धिर्व्यतीपातो वरीयान् परिघः शिवः॥
सिद्धः साध्यः शुभः शुक्लो ब्रह्मा चैन्द्रोऽथ वैधृतिः।
योगानां ज्ञेयमेतेषां स्वनामसदृशं फलम्॥[१]

---

[१] *मुहूर्तगणपतिः योगप्रकरणम् श्लो.सं.१-३ व्याख्याकारः – मुरलीधर चतुर्वेदी प्रकाशन- मोतीलाल वनारसी दास संस्करण वर्षम् १९८८*

योगसाधनार्थं रविचन्द्रकलानां योगः योगसंज्ञया ज्ञायते, अतो रविचन्द्रकलाः भभोगेन 800 कलाभिर्भक्ता यल्लब्धिः तद्विष्कुंभादिगतयोगो भवति। यच्छेषमवशिष्टं 60 भिरभ्यस्तं रविचन्द्रगतियोगेन भक्तं तद्वर्त्तमानयोगस्य गतगम्यकालः भवति। एवं वक्तुं शक्यते यद्-

क. शेषकलाः 60 भिर्गुणिता रविचन्द्रगतियोगभक्ता गतकला इति।

ख. शेषकलाः 800 कलयाशोधिताऽवशिष्टकलास्ताः 60 भिर्गुणिता रविचन्द्रगतियोगभक्ता तद्वर्त्तमानयोगगम्यकला इति।

योगसाधनम्-

$$\frac{\text{स्पष्टचन्द्रः} + \text{स्पष्टसूर्यः}}{800} = \text{लब्धिः} = \text{गतयोगसंख्या}$$

शेषं वर्त्तमानयोगस्य गतकलाः।

800 - शेषं = वर्त्तमानयोगस्य ऐष्यकलाः।

$$\frac{\text{ऐष्यकलाः} \times 60}{\text{सूर्यगतिः} + \text{चन्द्रगतिः}} = \text{ऐष्यघट्यादिमानम्।}$$

$$\frac{\text{गतकलाः} \times 60}{\text{सूर्यगतिः} + \text{चन्द्रगतिः}} = \text{गतघट्यादिकलाः इति।}$$

योगसाधनोपपत्तिः- स्पष्टरविचन्द्रयोर्योगो योग इति। योगास्तु 27 सप्तविंशतिः विष्कुंभादयः। अर्थात्स्पष्टमेव नक्षत्रवन्मानं योगानाम्। 800 कलातुल्यमेव, अतो-

$$\frac{\text{स्पष्टसूर्य} + \text{स्पष्टचन्द्र}}{800} = \text{लब्धिः गतयोगः।}$$

शेषं वर्त्तमानयोगगतकलाः। 800 - शेषं = भोग्यकलाः।

पुनश्चानुपातः- यदि रविचन्द्रगतियोगकलाभिः 60 घटिकास्तदा भुक्तभोग्यकलाभिः किमिति?

$$\frac{60 \times \text{भुक्तकलाः/भोग्यकलाः}}{\text{सूर्यगतिकलाः} + \text{चन्द्रगतिकलाः}} =$$

= वर्त्तमानयोगस्य भुक्तभोग्यमाने, इतिसिद्धिम्।

वासरः

सप्तवाराः भवन्ति- सूर्यवारः, सोमवारः, मंगलवारः, बुधवारः, गुरुवारः, शुक्रवारः, शनिवारः –

आदित्यश्चन्द्रमा भौमो बुधाश्चाथ वृहस्पतिः।
शुक्रः शनैश्चरश्चैव वासराः परिकीर्तिताः॥[१०]

वस्तुतस्तु वासराणां प्रयोगः प्रायशः सर्वेषु कार्येषु दरीदृश्यते। एतेषां वासराणां क्रमस्य सैद्धान्तिक कारणं सर्वेषु सिद्धान्तग्रन्थेषु आचार्यैः लिखितं वर्तते। वयं जानीमः यत् ग्रहाणां संख्या भौतिकरूपेण सप्त अस्ति। ते च सूर्यचन्द्रमंगलबुधगुरुशुक्रशनयः। उपरोक्तदिनानां क्रम एतदाधारितः। दिनानां नामकरणे महर्षिभिः काचित् युक्तिःआविष्कृता।

---

[१०] मुहूर्तगणपतिः वारप्रकरणम् श्लो.सं.१ व्याख्याकारः –मुरलीधर चतुर्वेदी प्रकाशन- मोतीलाल वनारसी दास संस्करण वर्षम्- १९८८

यथा

- दिनारम्भे प्रथमहोराया अधिपतिः वाराधिपतिः भवति।
- यो ग्रहः प्रथमहोराधिपतिः (दिनारम्भे प्रथमघण्टाधिपतिः) स एव तस्य दिनस्याधिपतिः भवति। अतः तस्यैव नाम्ना दिनस्य नाम भविष्यति। उदाहरणार्थं – रविवारस्य नामकरणे प्रयोजनं एतदस्ति यत् रविवारस्य प्रथमहोराया अधिपतिः सूर्यः

  परञ्च दिनानां नामकरणसम्बन्धे शास्त्रोक्तरीतिग्रहकक्षाक्रमः ज्ञातव्यः। तदाधारेण वयं दिनानां नामकरणप्रयोजनं ज्ञातुं शक्नोति।

ग्रहकक्षाक्रमः

नक्षत्रकक्षा



एषः क्रमः शनिग्रहाद् अधः क्रमेण भूमिपर्यन्तं विद्यते।

अत्र शनिः = १, गुरु = २, मंगलः = ३, सूर्यः = ४, शुक्रः = ५ बुधः = ६ चन्द्रः = ७ इति

अथ यदि प्रथमहोरायाः अधिपतिः शनिः तर्हि अधः क्रमेण गणना भवति।

१, शनिः = प्रथमहोराधिपतिः   २, गुरुः = द्वितीयहोराधिपतिः

३, मंगलः = तृतीयहोराधिपतिः ३, सूर्यः = चतुर्थहोराधिपतिः

४, शुक्रः = पञ्चमहोराधिपतिः   ५, बुधः = षष्ठहोराधिपतिः

६, चन्द्रः = सप्तमहोराधिपतिः

अनेन क्रमेण पुनः अनुवर्तनं भविष्यति। तर्हि अष्टमहोराधिपतिः शनिः नवमहोराधिपतिः गुरुः इति।

अत्र पूर्वमुक्तं यत् दिनारम्भे प्रथमहोराधिपतिः यो ग्रहः तस्य दिनस्य नामकरणं तदाधारेणैव भवति। अतः कल्प्यते दिनारंभे शनिः प्रथमहोराधिपतिः शनिः तर्हि सः वारः शनिवारः इति उच्यते। शानिवासरे द्वितीयहोराधिपतिः गुरुः तृतीयहोराधिपतिः मंगलः चतुर्थहोराधिपतिः सूर्यः इति। तर्हि अनेनैव क्रमेण शनिवासरे द्वाविंशः (२२) होराधिपतिः शनिः त्रयोविंशः होराधिपतिः गुरुः चतुर्विंशः होराधिपतिः मंगलः पञ्चविंशः होराधिपतिः सूर्यः।

पञ्चविंशतितमा होरा अग्रिमदिनस्य प्रथमा होरा अतः शनिवासरादनन्तरम् अग्रिमदिने प्रथमहोराया अधिपतिः सूर्यः। अतः तस्य दिनस्य नाम रविवासरः इति। पुनश्च रविवासरात् अधः क्रमेण गणनां कुर्मः चेत् पञ्चविंशतितमा होरा चन्द्रस्य भवति। अनेन क्रमेण सप्तदिनानां गणना कक्षाक्रमेण क्रियते। तेन सप्तदिनानां संबंधः सप्तग्रहैर्विद्यत इति

वस्तुतस्तु सृष्ट्यादौ प्रथमसूर्योदयात् वारगणना क्रमः आरब्धः तेन प्रथमवासरः रविवासरः।

"लङ्कानगर्यामुदयाच्चभानोस्तस्यैव वारे प्रथमं बभूव।
मधोः सितादेर्दिनमासवर्षयुगादिकानां युगपत् प्रवृत्तिः॥"[११]

रविवासरादारभ्य अधः क्रमेण गणना कृते सति पञ्चविंशतितमा होरा चन्द्रस्य। तेन अग्रिमदिनाधिपतिश्चन्द्रः। वासरोऽपि चन्द्रवासरः एव।

एकं अहोरात्रं चतुर्विंशतिहोरात्मकं भवति अतः चतुर्विंशतितमा होरा यदा समाप्यते अग्रिमदिनारम्भो भवति। अत्र एकस्मिन् अहोरात्रे सप्तग्रहाणां वारगणना क्रमे आवृत्तित्रयं भवति अतः -

ग्रहाः = ७

१ अहोरात्रे आवृत्तित्रयं = ७×३ = २१होराः (घण्टा)

१ अहोरात्रम् = २४ होराः

[११] *सिद्धान्तशिरोमणिःमध्यमाधिकारे कालमानाध्यायः श्लो सं.१५ व्याख्याकार- पं गिरिजा प्रसाद द्विवेदी, प्रकाशक- चौखम्भा विद्याभवन, संस्करण-२००७*

अतः एकस्मिन् अहोरात्रे (२४ घण्टा) ग्रहाणां आवृत्तित्रयं (२१) जातम्। अवशिष्टं घण्टात्रयम्। घण्टात्रयानन्तरं (होरात्रयम्) चतुर्थहोरायां अग्रिमदिनारम्भः अतः चतुर्थहोरा अग्रिमदिनस्य प्रथमा होरा। अतः यो ग्रहः चतुर्थहोराधिपः स एव अग्रिमदिनाधिपः भवति। एषः प्रसङ्गः सूर्यसिद्धान्तेऽपि दरीदृश्यते –

“मन्दादधः क्रमेण स्युश्चतुर्था दिवसाधिपाः...”[१२]

करणसाधनम्

करणज्ञानार्थं तिथ्यर्द्धं करणमिति प्रसिद्धमेव। अर्थात् एकस्यां तिथौ करणद्वयं सम्पद्यते, तत्र यावती घटिका तिथेर्मानं जायते, तस्यार्धकालं यावदेकं एवञ्च तिथेः अन्तिमं मानं यावत् अपरकरणं भवति।तत्राद्यानि चरकरणानि येषां संख्या सप्त भवन्ति। ते बवबालवादिनाम्ना ख्याता, एवमेव चत्वारि स्थिरकरणानि सन्ति। करणप्रसङ्गे सिद्धान्तफलितग्रन्थयोः वर्णनं विद्यते। तद्यथा- चरकरणानि-

करणानि चराख्यानि बवबालवकौलवम्।
तैतिलं गरवाणिज्ये विष्टिरेतानि सप्त च॥ [१३]

इत्यादिना- 1. बवकरणम् 2. बालवकरणम्। 3. कौलवकरणम्। 4. तैतिलकरणम्।

5. गरकरणम् 6. वणिजकरणम्। 7. विष्टि/भद्राकरणम्।

स्थिरकरणानि- तद्यथा-

परे कृष्णचतुर्दश्यां दले च शकुनिर्भवेत्।
दर्शे चतुष्पदं नागं पूर्वापरविभागयोः॥
शुक्ले प्रतिपदः पूर्वे दले किंस्तुघ्नसंज्ञकम्।
एतेषां करणानां हि चतुष्कं स्थिरसंज्ञकम्॥[१४]

1. कृष्णपक्षीयचतुर्दश्यामुत्तरार्द्धे शकुनिः।

2. अमावास्यायां पूर्वार्द्धे चतुष्पदः।

---

[१२] *सूर्यसिद्धान्तः, भूगोलाध्यायःश्लोसं.७८व्याख्याकार- डॉ.सत्येन्द्र मिश्र प्रकाशक- चौखम्भा संस्कृत भवन वाराणसी संस्करण-२००८*

[१३] *मुहूर्तगणपतिः करणप्रकरणम् श्लो.सं-०१ व्याख्याकारः –मुरलीधर चतुर्वेदी प्रकाशन- मोतीलाल वनारसी दास संस्करण वर्षम्- १९८८*

[१४] *मुहूर्तगणपतिः करणप्रकरणम् श्लो.सं-३-४ व्याख्याकारः –मुरलीधर चतुर्वेदी प्रकाशन- मोतीलाल वनारसी दास संस्करण वर्षम्- १९८८*

3. अमावास्यायामुत्तरार्द्धेनागः।

4. शुक्लपक्षीयप्रतिपत्पूर्वार्द्धे किंस्तुघ्नः।

वस्तुतस्तु मूलपाठः सूर्यसिद्धान्तानुसारेण कृष्णपक्षीयचतुर्दश्यामुत्तरार्द्धमारभ्य क्रमेण शकुनिचतुष्पदनागकिंस्तुघ्नादयो स्थिरकरणानिभवन्ति तदनन्तरं क्रमेण बवादिसप्तकरणानि भवन्ति। एकस्मिन् चान्द्रमासे एतानि बवादिकरणानि अष्टावृत्त्या भवन्ति। प्रत्येककरणस्य भोगमानं तिथ्यर्द्धतुल्यञ्च भवति, अर्थादेकस्यां तिथौ द्वे करणे भवतः। एवमपि एकस्मिन् चान्द्रमासे 60 षष्टिकरणानि भवन्ति।

प्रस्तूयतेऽत्र सूर्यसिद्धान्तीयमूलपाठः-

''ध्रुवाणि शकुनिर्नागं तृतीयं तु चतुष्पदम्।
किंस्तुघ्नं तु चतुर्दश्याः कृष्णायाश्चापरार्द्धतः॥
बवादीनि ततः सप्त चराख्यकरणानि च।
मासेऽष्टकृत्व एकैकं करणानां प्रवर्त्तते॥
तिथ्यर्धभोगं सर्वेषां करणानां प्रकल्पयेत्।
एषा स्फुटगतिः प्रोक्ता सूर्यादीनां खचारिणाम्॥''[१५]

करणोपपत्तिः-'तिथ्यर्द्धभोगं सर्वेषां करणानां प्रकल्पयेदिति' सूत्रानुसारेण तिथेरर्द्धमितप्रमाणमेकं करणमानं भवति। अतो एकस्मिन् चान्द्रमासे 30 त्रिंशत्तिथयो भवन्ति। अतोऽत्र द्विगुणितानि 30 x 2 = 60 प्रमितानि तिथ्यर्द्धानि तत्र शकुन्यादयो चत्वारि करणानि कृष्णपक्षीयचतुर्दशीत आरभ्य शुक्लपक्षीयपूर्वार्द्धं यावच्चत्वारि स्थिरकरणानि भवन्ति। अतो 60-4 = 56 तिथ्यर्द्धानि। एषु 7 सप्तचलकरणानि अतः 56 ÷7 = 8 अष्टावृत्तयो चलकरणानामित्युपपन्नम्। द्रष्टव्यमग्रे स्पष्टार्थचक्रम्-

शुक्लपक्षः			कृष्णपक्षः		
तिथयः	**पूर्वार्द्धे**	**उत्तरार्द्धे**	**तिथयः**	**पूर्वार्द्धे**	**उत्तरार्द्धे**
1	किंस्तुघ्नः	बवः	1	बालवः	कौलवः
2	बालवः	कौलवः	2	तैतिलः	गरः
3	तैतिलः	गरः	3	वणिजः	विष्टिः
4	वणिजः	विष्टिः	4	बवः	बालवः

[१५] *सूर्यसिद्धान्तः स्पष्टाधिकारः श्लो. सं. ६७-६९ व्याख्याकार- डॉ.सत्येन्द्र मिश्र प्रकाशक- चौखम्भा संस्कृत भवन वाराणसी संस्करण-२००८*

5	बवः	बालवः	5	कौलवः	तैतिलः
6	कौलवः	तैतिलः	6	गरः	वणिजः
7	गरः	वणिजः	7	विष्टिः	बवः
8	विष्टिः	बवः	8	बालवः	कौलवः
9	बालवः	कौलवः	9	तैतिलः	गरः
10	तैतिलः	गरः	10	वणिजः	विष्टिः
11	वणिजः	विष्टिः	11	बवः	बालवः
12	बवः	बालवः	12	कौलवः	तैतिलः
13	कौलवः	तैतिलः	13	गरः	वणिजः
14	गरः	वणिजः	14	विष्टिः	शकुनिः
15	विष्टिः	बवः	15	चतुष्पदः	नागः

पञ्चाङ्गसाधनप्रसङ्गे आचार्यभास्करेणापि उक्तमस्ति तद्यथा-

रविरसैः विरवीन्दुलवा हृताः फलमितास्तिथयः करणानि च।
कुरहितानि च तानि बवादितः शकुनितोऽसितभूतदलादनु॥
ग्रहकलाः सरवीन्दुकला हृताः खखगजैश्च भयोगमिति क्रमात्।
अथ हृताः स्वगतैष्यविलिप्तिकाः स्वगतिभिश्च गतागतनाडिका॥[१६]

~~~~~~~~~~~

[१६] *सिद्धान्तशिरोमणिः स्पष्टा. श्लो. ६६-६७ व्याख्याकार- पं गिरिजा प्रसाद द्विवेदी, प्रकाशक- चौखम्भा विद्याभवन, संस्करण-२००७*
~~~~~~~~~~~